# Shri Radhika Trailokyamangala kavacham

# શ્રીરાધિકા ત્રૈલોક્યમઙ્ગલકવચમ્

## Document Information

Text title : Radhika Trailokyamangala Kavacham

File name : rAdhikAtrailokyamangalakavacham.itx

Category : devii, devI, dashamahAvidyA, kavacha, rAdhA

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Description/comments : From Vasudevarahasya Radhatantra

Latest update : June 14, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 14, 2026

*sanskritdocuments.org*

# શ્રીરાધિકા ત્રૈલોક્યમઙ્ગલકવચમ્

શ્રીદેવ્યુવાચ ।
દેવદેવ મહાદેવ સૃષ્ટિસ્થિત્યન્તકારક ।
રાધિકાકવચં દેવ કથયસ્વ દયાનિધે ॥ ૧॥

ઈશ્વરોવાચ ।
શ ृણુ દેવિ વરારોહે કવચં જનમોહનમ્ ।
ગોપિતં સર્વતન્ત્રેષુ ઇદાનીં પ્રકટીકૃતમ્ ॥ ૨॥

યા રાધા ત્રિપુરાદૂતી ઉપવિદ્યા સદા તુ સા ।
ઉપવિદ્યાક્રમાદ્દેવિ કવચં શ ृણુ પાર્વતિ ॥ ૩॥

જપપૂજાવિધાનસ્ય ફલં સર્વસ્ય સિદ્ધિદમ્ ।
યત્ર તત્ર ન વક્તવ્યં કવચં ગોપિતં મહત્ ॥ ૪॥

ભક્તિહીનાય દેવેશિ દ્વિજનિન્દાપરાયણમ્ ।
ન શૂદ્રયાજિવિપ્રાય વક્તવ્યં પરમેશ્વરિ ॥ ૫॥

શિષ્યાય ભક્તિયુક્તાય શક્તિદીક્ષાપરાયણમ્ ।
વક્તવ્યં પરમેશાનિ મમ વાક્યં ન ચાન્યથા ॥ ૬॥

અથ શ્રીરાધિકા ત્રૈલોક્યમઙ્ગલ કવચં
વિનિયોગઃ -
ૐ અસ્ય શ્રીરાધાત્રૈલોક્યમઙ્ગલકવચસ્ય ગોપિકા ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીરાધિકા દેવતા, મહાવિદ્યા સાધન ગોપ્યર્થે વિનિયોગઃ ॥

ૐ પૂર્વે ચ પાતુ સા દેવી રુક્મિણી શુભદાયિની ।
હ્રીં પશ્ચિમે પાતુ સત્યા સર્વકામપ્રપૂરિણી ॥ ૭॥

યામ્યાં હ્રીં જામ્બવતી પાતુ સર્વકામફલપ્રદા ।
ઉત્તરે પાતુ ભદ્રા હ્રીં ભદ્રશક્તિસમન્વિતા ॥ ૮॥

ઊર્ધ્વં પાતુ મહાદેવી ક્લીં કૃષ્ણપ્રિયા યશસ્વિની ।
અધશ્ચ પાતુ ભો દેવી ઐં પાતાલતલવાસિની ॥ ૯॥

અધરે રાધિકા પાતુ ઐં પાતુ હૃદયં મમ ।
નમઃ પાતુ ચ સર્વાઙ્ગં ઙેયુતા ચ પુનઃ પુનઃ ॥ ૧૦॥

સર્વત્ર પાતુ મે દેવી ઈશ્વરી ભુવનેશ્વરી ।
ઐં હ્રીં રાધિકાયૈ હ્રીં ઐં શિરઃ પાતુ મામ્ ॥ ૧૧॥

ક્લીં ક્લીં રાધિકાયૈ ક્લીં ક્લીં દક્ષબાહું રક્ષતુ મમ ।
હ્રીં હ્રીં રાધિકાયૈ હ્રીં હ્રીં વામાઙ્ગં રક્ષતુ પદ્મિની પદ્મગન્ધિની ॥ ૧૨॥

ૐ હ્રીં રાધિકાયૈ ઐં ઐં દક્ષપાદં રક્ષતુ નમઃ ।
ક્લીં ક્લીં ઐં ઐં રાધિકાયૈ હ્રીં હ્રીં ઐં ઐં ક્લીં કલીં
ૐ સર્વાઙ્ગં મમ રક્ષતુ ।
હ્રીં રાધિકાયૈ હ્રીં વામપાદં રક્ષતુ સદા પદ્મિની ।
હ્રીં રાધિકાયૈ હ્રીં અક્ષિયુગ્મ રક્ષતુ મમ ।
ઐં રાધિકાયૈ ઐં કર્ણયુગ્મં સદા રક્ષતુ મમ ।
ૐ હ્રીં રાધિકાયૈ હ્રીં ૐ દન્તપઙ્ક્તિં સદા પાતુ સરસ્વતી ।
હ્રીં ભુવનેશ્વરી લલાટં પાતુ હ્રીં કાલી મે મુખમણ્ડલં સદાપાતુ ।
હ્રીં હ્રીં હ્રીં મહિષમર્દિન્યૈ હ્રીં હ્રીં મહિષમર્દિની
દ્વારકાવાસિની સહસ્રારં રક્ષતુ સદા મમ ।
ઐં હ્રીં ઐં માતઙ્ગી હૃદયં સદા મમ રક્ષતુ ।
હ્રીં ઐં હ્રીં ઉગ્રતારા નાભિપદ્મ સદા રક્ષતુ મમ ।
ક્લીં ઐં ક્લીં સુન્દરી ક્લીં ઐં ક્લીં સ્વાધિષ્ઠાનં લિઙ્ગમૂલં રક્ષતુ મમ ।
લં ઐં લં પૃથિવી ગુદમણ્ડલં રક્ષતુ મમ ।
ઐં ઐં ઐં બગલા ઐં ઐં ઐં સ્તનદ્વયં રક્ષતુ મમ ।
હેસૌઃ ભૈરવી હેસૌઃ સ્કન્ધદ્વયં રક્ષતુ મમ ।
હ્રીં અન્નપૂર્ણા હ્રીં ઘાટાં રક્ષતુ મમ ।
ઐં હ્રીં ઐં બીજત્રયં સદા પાતુ પૃષ્ઠદેશં મમ ।
ૐ મહાદેવઃ પાતુ સર્વાઙ્ગં મે ૐ નારાયણઃ પાતુ સર્વાઙ્ગં સદા મમ ।
ૐ ૐ કૃષ્ણઃ પાતુ સદા ગાત્રં રુક્મિણીનાથઃ ।
રુક્મિણી સત્યભામા ચ સૈવ્યા જામ્બવતી તથા ।
લક્ષ્મીશ્ચ મિત્રવિન્દા ચ ભદ્રા નાગ્નજિતા તથા ॥

એતાઃ સર્વા યુવતયઃ શોભનાશ્ચા સુલોચનાઃ ।
રક્ષેયુર્મામસ્તુ દિક્ષુ સતતં શુભદર્શનાઃ ॥

ૐ નારાયણશ્ચ ગોવિન્દઃ શિવઃ પદ્મદલેક્ષણઃ ।
સર્વાઙ્ગે મે સદા રક્ષેત્ કેશવઃ કેશિહા હરિઃ ॥

પદ્મિન્યાઃ પરમેશાનિ ઉપવિદ્યાસુ સઙ્ગતમ્ ॥

યઃ પઠેત્ પાઠયેદ્વાપિ સતતં ભક્તિતત્પરઃ ।
નિરાહરો જલત્યાગી અયુતં વત્સરે યદા ॥

તદૈવ પરમેશાનિ પદ્મિની વશતામિયાત્ ।
એતત્તે કથિતં દેવિ કવચં ભુવિ દુર્લભમ્ ॥

ફલમૂલજલં ત્યક્ત્વા પઠેત્ સંવત્સરં યદિ ।
પદ્મિની વશમાયાતિ તદૈવ નગનન્દિનિ ॥

અનેનૈવ વિધાનેન યઃ પઠેત્ કવચં પરમ્ ।
વિષ્ણુલોકમવાપ્નોતિ નાન્યથા વચનં મમ ॥

સઙ્ગોપ્ય પૂજયેદ્વિદ્યા મહાવિદ્યા વરાનને ।
પ્રકટાર્થમિદં દેવિ કવચં પ્રપઠેત્ સદા ॥

મહાવિદ્યાં વિના ભદ્રે યઃ પઠેત્ કવચં પ્રિયે ।
તદૈવ સહસા ભદ્રે કુમ્ભીપાકે વ્રજેત્ પ્રિયે ॥

॥ ઇતિ વાસુદેવરહસ્યે રાધાતન્ત્રે એકત્રિંશત્પટલે
શ્રીરાધિકાત્રૈલોક્યમઙ્ગલકવચમ્ ॥

Note :-

In this Kavach Stotra, Radha has been described as the Yogini or duti of Tripurasundari, hence she is not a Mahavidya but is a sub-mahavidya according to Radha Tantra, Different from the Radha Sadakshari Mahavidya of Narad Pancharatra. Padmini Radha who is a Upavidya is different from Radha Mahavidya who is described in NilTantra, Sammohak tantra, meru tantra, Krishnyamal, and Narad pancharatra.

Encoded and Proofread by Durga Sharma

*Shri Radhika Trailokyamangala kavacham*

pdf was typeset on June 14, 2026

Please send corrections to *sanskrit@cheerful.com*